व्रतविशिष्टे, त्रि । यथा,—

“तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्व्वीत पारणम् ॥”

इति तिथ्यादितत्त्वम् ॥

व्रश्च, ज श छेदे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-वेट् ।) दन्त्योपधः चयोगात् तालव्यः। तेन क्विपि शब्द्धाजेति षडि निमित्ताभावे नैमित्तिकस्याप्यभाव इति न्यायात् तालव्यस्य दन्त्यत्वे संयोगादेः सस्य लोपे सुवृट् इति । तथा च ।

“नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारः स्यात् षाट्टवर्गस्तवर्गजः ॥”

इति वोपदेवः ॥

अस्यार्थः । धातुषु मध्ये झलि झसे परे अनुस्वारपञ्चमौ नकारजौ ज्ञेयौ तालव्यशकारश्च दन्त्यसकारजातः मूर्द्धन्यषकारात् परस्टवर्गोऽपि तवर्गजातो ज्ञेय इति । भिक्षाश्याने इत्यादीनाञ्च षकारादिप्रकृतित्वे तस्थौ इत्यादिर्बोध्यम् । ज, अव्रश्चीत् अव्राक्षीत् । श, वृश्चति । इति दुर्गादासः ॥

व्रश्चनं, क्ली, (व्रश्च+ल्युट् ।) छेदनम् । व्रश्चधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, शतपथब्राह्मणे । ३ । ६ । ४ । ७ ।

“स रातमना वृश्चनाय भवति ॥”)

वृश्चनः, पुं, (व्रश्चति छिनत्ति पतित्रतीरिति । वृश्च+ल्युः । यद्वा, वृश्चत्यनेनेति करणे ल्युट् ।) स्वर्णादिच्छेदिका । छेनी इति भाषा । तत्पर्य्यायः । पत्रपरशुः २ । इत्यमरः ॥ पत्रपर्शुः ३ । इति शब्दरत्नावली ॥ स्वर्णलोहादिभेदकः ४ । इति जटाधरः ॥ वृक्षच्छेदनजातनिर्यासः । यथा,—

“देवतार्थं हविः शिग्रुं लोहितान् वृश्चनांस्तथा ।
अनुपाकृतमांसानि विड्जानि कवकानि च ॥”

इति याज्ञवल्क्यः ॥

व्रश्चनान् वृक्षच्छेदनजातान् लोहितानपि । यथा, मनुः ।

“लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ।”

इति मिताक्षरायामाचाराध्यायः ॥

(करणे ल्युटि तस्य कुठारादिवाचकता विशेष्यलिङ्गता च । यथा, कातन्त्रे कृतस्तु करणाधिकरणयोश्चेत्यत्र कलापचन्द्रः । “युडन्तस्य शब्दः प्रायो विधेयलिङ्गग्राही यथा वृश्चनः कुठारो गोदोहनी घटी टङ्कः पाषाणदारण इति ।”)

व्राजिः, स्त्री, (व्रजति गच्छतीति । व्रज गतौ+“वसिवपियजीति ।” उणा० ४ । १२४ । इति इञ् ।) वायुः । व्रजधातोरौणादिकेञ्प्रत्ययेन निष्पन्नमेतत् ॥

व्रातः, पुं, समूहः । इत्यमरः ॥ (यथा, भागवते । ४ । २५ । १६ ।

“नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः ।
आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥”)

व्याधादिः । इति व्रात्यशब्दटीकायां भरतः ॥ (मनुष्यः । इति निघण्टुः । २ । ३ । “वृञ् वरणे ‘तातव्रातलातसुपित्त’ इत्यादिसूत्रेण भोजराजेन क्तप्रत्यये आड़ागमो निपात्यते । वृण्वन्ति स्वमभिमतं देवताभ्यः तपसाराधितेभ्यः प्रविशन्ते वा यज्ञादौ । यद्वा, व्रातो धान्यादिसञ्चयः । तद्वन्तो व्राता मत्वर्थीयोऽकारः । यद्वा, व्रतमिति कर्म्मनाम अन्नं वा । अन्नमपि व्रतायैतस्मादेवेत्युक्तेः तदीयाः ‘तस्येदम्’ इत्यण् । ‘कर्म्मणा जायते जन्तुः कर्म्मणैव प्रसूयते’ इत्युक्तेः कर्म्मणामधिकारित्वाच्च मनुष्याणां कर्म्मसम्बन्धित्वम् । ‘अथो अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्द्धन्ते’ इति । अन्नात् रेतो रेतसः पुरुषः इति च श्रुतेः मनुष्याणामन्नसम्बन्धित्वम् ।” इति तट्टीकायां देवराजयज्वा ॥ अस्मिन्नर्थे प्रायशो बहुवचनप्रयोगो दृश्यते ॥ * ॥ क्ली, शरीरायाससजीविकर्म्म । इति काशिका । ५ । २ । २१ ॥)

व्रातीनः, पुं, (शरीरायासेन ये जीवन्ति तेषां कर्म्म व्रातं तेन जीवतीति । व्रात+“व्रातेन जीवति ।” ५ । २ । २१ । इति खञ् ।) संघजीवी । इति हेमचन्द्रः ॥ (यथा, भट्टिः ।४।१२।

“व्रातीनव्यालदीप्रास्त्रैः सुत्वनः परिपूजयन् ॥”)

व्रात्यः, पुं, (व्रातो व्याधादिः स इव । “शाखादिभ्यो यत् ।” ५ । ३ । १०३ । इति यत् ।) दशसंस्काररहितः । षोड़शवर्षादूर्द्ध्वं असंस्कृतव्रतबन्धो अकृतसावित्रीको वा । इति भरतः ॥ तत्पर्य्यायः । संस्कारहीनः २ । इत्यमरः ॥ सावित्रीपतितः ३ वागदुष्टः ४ पुरुषोक्तिकः ५ । इति जटाधरः ॥ तस्य प्रायश्चित्तादि यथा,—

“अथ व्रात्यविधिं देवि ! प्रायश्चित्तन्तु यद्भवेत् ।
तत् शृणुष्व महेशानि सर्व्ववर्णे विशेषतः ॥
दश वर्षाणि पञ्चैव ब्राह्मणस्योपनीयते ।
एकविंशतिवर्षाणि यावद्वैश्यमुपावशेत् ।
अत ऊर्द्ध्वं पतन्त्येव सर्व्वधर्म्मबहिष्कृताः ॥
गायत्रीपतिता व्रात्या व्रात्यस्तोमेन संस्कृताः ।
अशक्ते चैव यज्ञस्य चरेदौद्दालिकं व्रतम् ॥
द्वौ मासौ यावकाहारो मासमेकं पयः पिबेत् ।
दध्ना च पक्षमेकन्तु सप्तरात्रं घृतेन तु ॥
अयाचितेन षड्रात्रं त्रिरात्रं वर्त्तयेज्जलैः ।
अहोरात्रं न भुञ्जीत ततः संस्कारमर्हति ॥
पतिता यस्य गायत्री दश वर्षाणि पञ्च च ।
प्रायश्चित्तं भवेत्तस्य प्रोवाच भगवान् शिवः ॥
सशिखं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः ।
हविष्यं भोजयेदन्नं ब्राह्मणान् सप्त पञ्च वा ॥
एकविंशतिरात्रन्तु पिबेत् प्रसृतियावकम् ।
ततो यावकशुद्धस्य तस्योपनयनं स्मृतम् ॥
व्रतस्याचरणाशक्तौ कुर्य्याच्चान्द्रायणत्रयम् ।
सावित्रीपतिता येषां देशकालादिविप्लवात् ॥
चान्द्रायणं चरेद्द्वयस्तु व्रतान्ते धेनुमुत्सृजेत् ।
क्षीरं वापि पिबेन्मासं दद्याद्गां वत्सशालिनीम् ॥”

इति मत्स्यसूक्ते प्रायश्चित्तप्रकरणे ३८ पटलः ॥

व्रात्यस्तोमः, पुं, यज्ञविशेषः । यथा,—

“सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥”

इति गारुड़े ६४ अध्याये ॥ तथा, याज्ञवल्क्ये । १ । ३८ ॥

व्री, ग शि वृत्याम् । इति कविकल्पद्रुमः ॥ (क्र्या०-प्या०-पर०-सक०-अनिट् ।) रेफोपधः । शि, व्रिणाति । व्रीणः वीणिः । ग, यो व्रीणाति जयश्रियं रणसुखे । व्रीतः व्रीतिः । इति दुर्गादासः ॥

व्री, य ङ ओ गतौ । वृत्याम् । इति कविकल्पद्रुमः ॥ (दिवा० आत्म०-सक०-अनिट् ।) रेफोपधः ॥ य ङ, व्रीयते । ओ, व्रीणः । इति दुर्गादासः ॥

व्रीड़, य ञि त्रिपि । लज्जे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-लज्जे-अक०-सेट् ।) रेफयुक्तः । य, व्रीड्यति बाणं चापः । व्रीड्यति वधूः । ञि, व्रीड़ितोऽस्ति । इति दुर्गादासः ॥

व्रीड़ः, पुं, (व्रीड़+भावे घञ् ।) लज्जा । इत्यमरः ॥ (यथा, कुमारे । ७ । ६७ ।

“न नूनमारूढ़रुषा शरीरमनेन दग्धं कुसुमायुधस्य ।
व्रीड़ादमुं देवमुदीक्ष्य मन्ये सन्न्यस्तदेहः स्वयमेव कामः ॥”)

व्रीड़नं, क्ली, (व्रीड़+ल्युट् ।) लज्जा । यथा,—

“अथ मन्दाक्षमन्दास्यं लज्जा लज्या च त्रीक्षपा ।
व्रीड़ो व्रीड़ा व्रीड़नञ्च लज्जापर्य्याय ईरितः ॥”

इति शब्दरत्नावली ॥

व्रीड़ा, स्त्री, (व्रीड़+“गुरोश्च हलः ।” ३ । ३ । १०३ । इत्यः । टाप् ।) लज्जा । इत्यमरः ॥ (यथा आर्य्यासप्तशत्याम् । ३५७ ।

“प्रातरुपागत्य मृषा वदतः सखि नास्य विद्यते व्रीड़ा ।
सुखलम्भयापि योऽयं न लज्जते दग्धकालिकया ॥”)

व्रीस, कि वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-सक०-सेट् ।) कि, व्रीसयति व्रीसति । इति दुर्गादासः ॥

व्रीहिः, पुं, (वर्हति वृद्धिं गच्छतीति । वृह वृद्धौ+“इगुपधात् कित् ।” उणा० ४ । ११८ । इति इन् । पृषोदरादित्वात् साधुः ।) धान्यमात्रम् । आशुधान्यम् । इत्यमरः ॥ अस्य सामान्यनामगणना गुणाश्च यथा,—

“धान्यं भोग्यञ्च भोगार्हमन्नाद्यं जीवसाधनम् ।
तच्च तावत्त्रिधा ज्ञेयं शूकशिम्बीतृणाह्वयम् ॥
व्रीह्यादिकं यदि ह शूकसमन्वितं स्यात्
यत् शूकधान्यमथ सुन्नमकुष्ठकादि ।
शिम्बीनिगूढ़मिति तत्प्रवदन्ति शिम्बीधान्यं तृणोद्भवतया तृणधान्यमन्यत् ।
तत्र त्रिदोषशमनं लघु शूकधान्यं
तेजोबलातिशयवीर्य्यविवृद्धिदायि ।
शिम्बीभवं गुरु हिमञ्च विबन्धदायि
वातालकन्तु शिशिरं तृणधान्यमाहुः ॥